# putragItA

# પુત્રગીતા

## Document Information

Text title : putragItA

File name : putragItA.itx

Category : gItA, giitaa

Location : doc_giitaa

Description-comments : adhyAya 175/174

Source : Mahabharata, Shantiparva, Mokshadharmaparva, pitAputrasaMvAda

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# પુત્રગીતા

ભીષ્મેણ યુધિષ્ઠિરમ્પ્રતિ કાલસ્ય દ્રુતતરપાતિતય સદ્યઃ સાધનસ્ય સમ્પાદનીયત્વે પ્રમાણતયા પિતૃપુત્રસંવાદાનુવાદઃ ॥ ૧॥

યુધિષ્ઠિર ઉવાચ । ૦
અતિક્રામતિ કાલેઽસ્મિન્સર્વભૂતક્ષયાવહે ।
કિં શ્રેયઃ પ્રતિપદ્યેત તન્મે બ્રૂહિ પિતામહ ॥ ૧
ભીષ્મ ઉવાચ । ૨
અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
પિતુઃ પુત્રેણ સંવાદં તં નિબોધ યુધિષ્ઠિર ॥ ૨
દ્વિજાતેઃ કસ્યચિત્પાર્થ સ્વાધ્યાયનિરતસ્ય વૈ ।
બભૂવ પુત્રો મેધાવી મેધાવીનામ નામતઃ ॥ ૩
સોઽબ્રવીત્પિતરં પુત્રઃ સ્વાધ્યાયકરણે રતમ્ ।
મોક્ષધર્માર્થકુશલો લોકતન્ત્રવિચક્ષણઃ ॥ ૪
પુત્ર ઉવાચ । ૫
ધીરઃ કિંસ્વિત્તાત કુર્યાત્પ્રજાનન્
ક્ષિપ્રં હ્યાયુર્ભ્રશ્યતે માનવાનામ્ ।
પિતસ્તદાચક્ષ્વ યથાર્થયોગં
મમાનુપૂર્વ્યા યેન ધર્મં ચરેયમ્ ॥ ૫
પિતોવાચ। ૬
વેદાનધીત્ય બ્રહ્મચર્યેણ પુત્ર
પુત્રાનિચ્છેત્પાવનાર્થં પિતૃણામ્ ।
અગ્નીનાધાય વિધિવચ્ચેષ્ટયજ્ઞો
વનં પ્રવિશ્યાથ મુનિર્બુભૂષેત્ ॥ ૬
પુત્ર ઉવાચ । ૭
એવમભ્યાહતે લોકે સમન્તાત્પરિવારિતે ।
અમોઘાસુ પતન્તીષુ કિં ધીર ઇવ ભાષસે ॥ ૭

પિતોવાચ। ૮
કથમભ્યાહતો લોકઃ કેન વા પરિવારિતઃ ।
અમોઘાઃ કાઃ પતન્તીહ કિન્નુ ભીષયસીવ મામ્ ॥ ૮
પુત્ર ઉવાચ । ૯
મૃત્યુનાભ્યાહતો લોકો જરયા પરિવારિતઃ ।
અહોરાત્રાઃ પતન્ત્યેતે નનુ કસ્માન્ન બુધ્યસે ।
અમોઘા રાત્રયશ્ચાપિ નિત્યમાયાન્તિ યાન્તિ ચ ॥ ૯
પિતોવાચ। ૧૦
યથાઽહમેતજ્જાનામિ ન મૃત્યુસ્તિષ્ઠતીતિ હ ।
સોઽહં કથં પ્રતીક્ષિષ્યે જાલેનેવાવૃતશ્ચરન્ ॥ ૧૦
પુત્ર ઉવાચ । ૧૧
રાત્ર્યાંરાત્ર્યાં વ્યતીતાયામાયુરલ્પતરં યદા ।
તદૈવ બન્ધ્યં દિવસમિતિ વિન્ધાદ્વિચક્ષણઃ ॥ ૧૧
ગાધોદકે મત્સ્ય ઇવ સુખં વિન્દેત કસ્તદા ।
અનવાપ્તેષુ કામેષુ મૃત્યુરભ્યોતિ માનવમ્ ॥ ૧૨
પુષ્પાણીવ વિચિન્વન્તમન્યત્ર ગતમાનસમ્ ।
વૃકીવોરણમાસાદ્ય મૃત્યુરાદાય ગચ્છતિ ॥ ૧૩
અદ્યૈવ કુરુ યચ્છ્રેયો મા ત્વાં કાલોઽત્યગાદયમ્ ।
અકૃતેષ્વેવ કાર્યેષુ મૃત્યુર્વૈ સમ્પ્રકર્ષતિ ॥ ૧૪
શ્વઃ કાર્યમદ્ય કુર્વીત પૂર્વાહ્ણે ચાપરાહ્ણિકમ્ ।
નહિ પ્રતીક્ષતે મૃત્યુઃ કૃતમસ્ય ન વા કૃતમ્ ॥ ૧૫
કો હિ જાનાતિ કસ્યાદ્ય મૃત્યુકાલો ભવિષ્યતિ ।
યુવૈવ ધર્મશીલઃ સ્યાદનિત્યં ખલુ જીવિતમ્ ।
કૃતે ધર્મે ભવેત્કીર્તિરિહ પ્રેત્ય ચ વૈ સુખમ્ ॥ ૧૬
મોહેન હિ સમાવિષ્ટઃ પુત્રદારાર્થમુદ્યતઃ ।
કૃત્વા કાર્યમકાર્યં વા પુષ્ટિમેષાં પ્રયચ્છતિ ॥ ૧૭
તં પુત્રપશુસમ્પન્નં વ્યાસક્તમનસં નરમ્ ।
સુપ્તં વ્યાઘ્રો મૃગમિવ મૃત્યુરાદાય ગચ્છતિ ॥ ૧૮
સઞ્ચિન્વાનકમેવૈનં કામાનામવિતૃપ્તકમ્ ।
વ્યાઘ્રઃ પશુમિવાદાય મૃત્યુરાદાય ગચ્છતિ ॥ ૧૯
ઇદં કૃતમિદં કાર્યમિદમન્યત્કૃતાકૃતમ્ ।
એવમીહાસુખાસક્તં કૃતાન્તઃ કુરુતે વશે ॥ ૨૦

કૃતાનાં ફલમપ્રાપ્તં કર્મણાં કર્મસંજ્ઞિતમ્ ।
ક્ષેત્રાપણગૃહાસક્તં મૃત્યુરાદાય ગચ્છતિ ॥ ૨૧
દુર્બલં બલવન્તં ચ શૂરં ભીરું જડં કવિમ્ ।
અપ્રાપ્તં સર્વકામાર્થાન્મૃત્યુરાદાય ગચ્છતિ ॥ ૨૨
નૃત્યુર્જરા ચ વ્યાધિશ્ચ દુઃખં ચાનેકકારણમ્ ।
અનુષક્તં યદા દેહે કિં સ્વસ્થ ઇવ તિષ્ઠસિ ॥ ૨૩
જાતમેવાન્તકોઽન્તાય જરા ચાન્વેતિ દેહિનમ્ ।
અનુષક્તા દ્વયેનૈતે ભાવાઃ સ્થાવરજઙ્ગમાઃ ॥ ૨૪
અત્યોર્વા મુખમેતદ્વૈ યા ગ્રામે વસતો રતિઃ ।
વાનામેષ વૈ ગોષ્ઠો યદરણ્યમિતિ શ્રુતિઃ ॥ ૨૫
તેબન્ધની રજ્જુરેષા યા ગ્રામે વસતો રવિ ।
છેત્ત્વેતા સુકૃતો યાન્તિ નૈનાં છિન્દન્તિ દુષ્કૃતઃ ॥ ૨૬
હિંસયતિ યો જન્તૂન્મનોવાક્કાયહેતુભિઃ ।
જીવિતાર્થાપનયનૈઃ પ્રાણિભિર્ન સ હિંસ્યતે ॥ ૨૭
ન મૃત્યુસેનામાયાન્તીં જાતુ કશ્ચિત્પ્રબાધતે ।
ઋતે સત્યમસત્ત્યાજ્યં સત્યે હ્યમૃતમાશ્રિતમ્ ॥ ૨૮
તસ્માત્સત્યવ્રતાચારઃ સત્યયોગપરાયણઃ ।
સત્યાગમઃ સદા દાન્તઃ સત્યેનૈવાન્તકં જયેત્ ॥ ૨૯
અમૃતં ચૈવ મૃત્યુશ્ચ દ્વયં દેહે પ્રતિષ્ઠિતમ્ ।
મૃત્યુરાપદ્યતે મોહાત્સત્યેનાપદ્યતેઽમૃતમ્ ॥ ૩૦
સોઽહં હ્યહિંસ્રઃ સત્યાર્થી કામક્રોધબહિષ્કૃતઃ ।
સમદુઃખસુખઃ ક્ષેમી મૃત્યુંહાસ્યામ્યમર્ત્યવત્ ॥ ૩૧
શાન્તિયજ્ઞરતો દાન્તો બ્રહ્મયજ્ઞે સ્થિતો મુનિઃ ।
વાઙ્ભનઃ કર્મયજ્ઞશ્ચ ભવિષ્યામ્યુદગાયને ॥ ૩૨
પશુયજ્ઞૈઃ કથં હિંસ્રૈર્માદૃશો ચષ્ટુમર્હતિ ।
અન્તવદ્ભિરિવ પ્રાજ્ઞઃ ક્ષેત્રયજ્ઞૈઃ પિશાચવત્ ॥ ૩૩
યસ્ય વાઙ્ભનસી સ્યાતાં સમ્યક્પ્રણિહિતે સદા ।
તપસ્ત્યાગશ્ચ સત્યં ચ સ વૈ સર્વમવાપ્નુયાત્ ॥ ૩૪
નાસ્તિ વિદ્યાસમં ચક્ષુર્નાસ્તિ સત્યસમં તપઃ ।
નાસ્તિ રાગસમન્દુઃખં નાસ્તિ ત્યાગસમં સુખમ્ ॥ ૩૫
આત્મન્યેવાત્મના જાત આત્મનિષ્ઠોઽપ્રજોઽપિ વા ।
આત્મન્યેવ ભવિષ્યામિ ન માં તારયતિ પ્રજા ॥ ૩૬

નૈતાદૃશં બ્રાહ્મણસ્યાસ્તિ વિત્તં
યથૈકતા સમતા સત્યતા ચ ।
શીલં સ્થિતિર્દણ્ડનિધાનમાર્જવં
તતસ્તતશ્ચોપરભઃ ક્રિયાભ્યઃ ॥ ૩૭
કિં તે ધનૈર્બાન્ધવૈર્વાપિ કિં તે
કિં તે દારૈર્બ્રાહ્મણ યો મરિષ્યસિ ।
આત્માનમન્વિચ્છ ગુહાં પ્રવિષ્ટં
પિતામહાસ્તે ક્વ ગતાઃ પિતા ચ ॥ ૩૮
ભીષ્મ ઉવાચ । ૩૯
પુત્રસ્યૈતદ્વચઃ શ્રુત્વા યથાઽકાર્ષીત્પિતા નૃપ ।
તથા ત્વમપિ વર્તસ્વ સત્યધર્મપરાયણઃ ॥ ॥ ૩૯

ઇતિ શ્રીમન્મહાભારતે શાન્તિપર્વણિ મોક્ષધર્મપર્વણિ
ચતુઃસપ્તત્યધિકશતતમોઽધ્યાયઃ ॥ ૧૭૪.।

Mahabharata - Shanti Parva - Chapter Footnotes

૪ મોક્ષધર્માણામર્થેષુ કુશલઃ ॥

૫ યથાર્થયોગં ફલસમ્બન્ધમનતિક્રમ્ય તાત
કુર્યાચ્છુભાર્થી ઇતિ ડ।થ।પાઠઃ । તાત કુર્યાત્પ્રજાસુ ઇતિ ટ। પાઠઃ ॥

૭ અમોઘાસ્વાયુર્હરણેન સફલાસુ રાત્રિષુ ॥

૧૧ વન્ધ્યં નિષ્ફલમ્ ॥

૧૨ યદા મૃત્યુરભ્યેતિ તદા કઃ સુખં વિન્દેતેતિ સમ્બન્ધઃ ॥

૧૩ પુષ્પાણિ કામ્યકર્મફલાનિ મેષીણામાર્તવાનિ વા । આર્તવં વિના
પશૂનાં સ્ત્રીસઙ્ગે પ્રવૃત્ત્યદર્શનાત્। વિચિન્વન્તં શાસ્ત્રદૃષ્ટ્યા
આઘ્રાણેન ચ। ઉરણં મેષમ્ ॥

૧૭ એષાં પુત્રાદીનામ્ ॥

૧૯ સઞ્ચિન્વાનકં કુત્સિતં સઞ્ચિન્વાનં સઙ્ગ્રહીતારમ્ ॥

૨૦ કાર્યં કર્તુમિષ્ટમ્ । કૃતાકૃતમર્ધકૃતમ્ ॥

ઈહા તૃષ્ણા ॥

૨૧ કર્મસંજ્ઞિતં વણિગિત્યાદિ કર્માનુરૂપસંજ્ઞાવન્તમ્ ॥

૨૪ દ્વયેનાન્તકજરાખ્યેન ॥

૨૫ ગ્રામે ખ્યાદિસઙ્ઘે રતિરાસક્તિરેવ મૃત્યોર્મુખં
ન તુ વાસમાત્રમ્ । ગોષ્ઠમિવ ગોષ્ઠં વાસસ્થાનામ્। અરણ્યં
વિવિક્તદેશઃ। ગૃહં ત્યક્ત્વૈકાન્તે ધ્યાનપરો ભવેદિત્યર્થઃ ॥

૨૬ યાન્તિ મુક્તિમિતિ શેષઃ ॥

૨૭ ન હિંસયતિ હિંસાં ન કારયતિ ન કરોતિ ચેત્યર્થઃ । હેતુઃ
શ્રાદ્ધાદિનિમિત્તં તૈઃ જીવિતમર્થાંશ્ચાપનયન્તિ તૈર્હિંસ્નસ્તેનાદિભિઃ
॥

૨૮ મૃત્યુસેનાં જરાવ્યાધિરૂપાં સત્યે બ્રહ્મજ્ઞાને અમૃતં
કૈવલ્યમ્ ॥

૨૯ સત્યવ્રતાચારઃ સત્યં બ્રહ્મજ્ઞાને તદર્થં વ્રતં
વેદાન્તશ્રવણાદિ તદાચારસ્તદનુષ્ઠાતા । સત્યયોગપરાયણઃ
બ્રહ્મધ્યાનપરાયણઃ। સત્યઃ પ્રમાણભૂત આગમો ગુરુવે દવાક્યં યસ્ય
સ સત્યાગમઃ શ્રદ્ધાવાન્ ॥

૩૨ શાન્તિયજ્ઞ ઇન્દ્રિયનિગ્રહઃ । બ્રહ્મયજ્ઞો
નિત્યમુપનિષદર્થચિન્તનમ્। વાગ્યજ્ઞઃ જપઃ। મનોયજ્ઞઃ
ધ્યાનં। કર્મયજ્ઞઃ સ્નાનશૌચગુરુશુશ્રૂષાદ્યાવશ્યક
ધર્માનુષ્ઠાનમ્। ઉદગાયને દેવયાનપથનિમિત્તમ્। દૈર્ઘ્યમાર્ષમ્ ॥

૩૩ અન્તવદ્ભિરનિત્યફલૈઃ । ક્ષેત્રયજ્ઞૈઃ શરીરનાશનૈઃ ॥

૩૬ આત્મનિ પરમાત્મનિ પ્રલયે સ્થિત ઇતિ શેષઃ । આત્મના
સૃષ્ટિકાલે જાતઃ ॥

૩૭ એકતા એકપ્રકારતા શીલં શ્લાઘનીયં વૃત્તમ્
। દણ્ડનિધાનં વાઙ્મનઃ કાયૈર્હિંસાત્યાગઃ ॥

shAntiparva (12), adhyAya 174 (adhyAya number defers in the scanned file.)
httpsH//archive.org/details/in.ernet.dli.2015.345584

*putragItA*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*